श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

देवैः रचितम्

# ॥ श्री नरसिंहगद्यस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री नरसिंहगद्यस्तुतिः ॥

भक्तिमात्रप्रतीत !

नमस्ते नमस्ते !

अखिलमुनिजननिवह !

विहितसवनकदनकर !

खरचपलचरितभयद !

बलवदसुरपतिकृतविविधपरिभवभयचकित !

निजपदचलित निखिलमखमुखविरहकृशतरजलज भवमुख सकल सुरवरनिकर कारुण्याविष्कृतचण्ड दिव्य नृसिंहावतार !

स्फुरितोदग्रतारध्वनिभिन्नाम्बरतार !

निजरणकरणरभसचलितरणद सुरगणपटुपटहविकटरव परिगत चटुलभटरवरणित परिभवकर धरणिधर !

कुलिशघट्टनोद्भूतध्वनिगम्भीरात्मगर्जितनिर्जितघनाघन !

ऊर्जितविकटगर्जितसृष्टखलतर्जित सद्गुणगणोर्जित !

योगिजनार्जित !

सर्वमलवर्जित !

लक्ष्मीघनकुचतटनिकटविलुण्ठन विलग्न कुङ्कुम पङ्कशङ्काकरारुण मणिकिरणानुरञ्जितविगत शशाकळङ्क शशाङ्कपूर्णमण्डलवृत्त स्थूलधवळमुक्तामणि विघट्टितदिव्यमहाहार !

ललितदिव्यविहार !

विहितदितिज प्रहार !

लीलाकृतजगद्विहार !

www.prapatti.com

संसृतिदुःखसमूहापहार !

विहितदनुज्ञापहार !

युगान्तभुवनापहार !

अशेषप्राणिगणविहित !

सुकृतदुष्कृत !

सुदीर्घदण्डभ्रामित बृहत्कालचक्रभ्रमणकृतिलब्धप्रारम्भ !

स्थावरजङ्गमात्मकसकलजगज्जालजल धारणसमर्थ ब्रह्माण्ड
नामधेयमहापिठरकरण प्रवीणकुम्भकार !

निरस्तसर्वविस्तार !

निरस्तषड्भावविकार !

विविधप्रकार !

त्रिभुवनप्रकार !

अनिरूपितनिजाकार !

नियतभिक्षादिलब्धगतरसपरिमित भोज्यमात्रसन्तोष !

बलविजित मदमदननिद्रादिदोषजनधनस्नेहलोभादि दृढबन्धनच्छेद
लब्धसौख्य सततकृतयोगाभ्यासनिर्मलान्तःकरणयोगीन्द्र
कृतसन्निधान !

त्रिजगन्निधान !

सकलप्रधान !

मायापिधान !

सुशुभाभिधान !

मदविकसदसुरभटमकुट वनानलनिभनयन !

विलसदसिकवचभुजघनवनलवननवरुधिरक्रमकल्पित मीन
शञ्चत्तरङ्गशैवालमहाजलूकदुस्तरपङ्कजलनिवहकलित
महासुरपृतनाकमलिनीविलोलनकेळिप्रिय मत्तवारण !

www.prapatti.com

दुष्टजन मारण !

शिष्टजनतारण !

नित्यसुखविचारण !

सिद्धबलकारण !

सुदुष्टासुरदारण !

सदृशीकृताञ्जन !

जनदोषभञ्जन !

घनचिन्निरञ्जन !

निरन्तरकृतभक्तवाञ्छन !

गतसर्ववाञ्छन !

विश्वनाटकसूत्रधार !

अङ्घ्रिधूलिजातखसिन्धुधार !

मध्वसृक्कृत चक्रधार !

जनितकाम !

विगतकाम !

सुरजनकाम !

उद्धृतक्षम निश्चलजनसत्क्रियाक्षम !

सुरनतचरण !

धृतरथचरण !

विविधसुरविहरण !

विगतविकार !

विकरण !

विबुधजनशरण !

सततप्रीत !

त्रिगुणव्यतीत !

प्रणतजनवत्सल !

नमस्ते नमस्ते !

॥ इति श्री नरसिंहगद्यस्तुतिः सम्पूर्णः ॥

www.prapatti.com